SUṢAMĀ : Multidisciplinary Research Journal ISSN: 3107-4529
(International Peer-Reviewed & Refereed Journal)
Vol. 1, Issue-4, (Oct-Dec) 2025

# भामहाचार्यकृतकाव्यालङ्कारसन्दर्भे न्यायतत्त्वचिन्तनम्

**Tapas Pal**
Research Scholar
Department of Sanskrit
University of Delhi, New Delhi, India
Email: tapaspal735@gmail.com

**Abstract**: अयं शोधप्रबन्धः भामहाचार्यस्य 'काव्यालङ्कार' ग्रन्थं केन्द्रं कृत्वा न्यायशास्त्रस्य तत्त्वानां विश्लेषणं करोति। यद्यपि 'काव्यालङ्कारः' काव्यशास्त्रस्य ग्रन्थः, तथापि तस्य पञ्चमे परिच्छेदे 'न्यायनिर्णयः' इति नाम्ना दर्शनशास्त्रस्य, विशेषतः न्यायशास्त्रस्य प्रमाणविषयस्य सन्निवेशः कृतोऽस्ति। आचार्यभामहेन अल्पबुद्धिजनानां कृते शास्त्रस्य दुर्बोधविषयं काव्यस्य माधुर्येण सरलेन च प्रकारेण बोधगम्यं कर्तुम् एषः न्यायतत्त्वसङ्ग्रहः कृतः। भामहः प्रत्यक्षम् अनुमानञ्च इति द्विविधं प्रमाणं स्वीकरोति। प्रमाणप्रसङ्गे आचार्यः बौद्धनैयायिकानां "प्रत्यक्षं कल्पनापोढम्" इति लक्षणं युक्तिभिः खण्डयति। तेन प्रतिपाद्यते यत् नाम-जाति-आदि-उपाधियुक्तं वस्तु एव प्रत्यक्षस्य विषयो भवति, उपाधिविहीनं केवलं व्यक्तिमात्रं न। भामहस्य मते 'सदर्थालम्बनं च तत्'। अनुमानप्रमाणस्य विषये सः त्रिरूपाल्लिङ्गतः ज्ञानम् अनुमानं मन्यते, तथा च परार्थानुमानस्य पञ्चावयववाक्येषु प्रतिज्ञा-हेतु-उदाहरणानि एव स्वीकरोति। एतस्मिन् परिच्छेदे प्रतिज्ञादोषेषु तदर्थविरोधिनी-दोषः, तथा हेत्वाभासस्य लक्षणमपि उदाहृतमस्ति। अनेन प्रकारेण भामहाचार्यः स्वग्रन्थे न्यायतत्त्वानां समावेशेन अलङ्कारसम्प्रदायस्य प्रतिष्ठापकः सन् अपि स्वस्य विद्वत्तां तथा शास्त्रपारङ्गततां दर्शयति।

**Keywords:** भामहाचार्यः, काव्यालङ्कारः, न्यायतत्त्वानि, प्रत्यक्षम्, अनुमानम्, हेतुः, हेत्वाभासः।

काव्यालङ्कारः ग्रन्थोऽयं काव्यशास्त्ररूपेण परिचयो लभ्यते। परन्तु अत्र भामहाचार्यः न्यायशास्त्रस्य किञ्चित् विषयमुपस्थाप्य शास्त्रं प्रति मनोनिवेशयति। शास्त्राध्ययनमिति अतीव दुर्बोध्यव्यापारम्। अल्पबुद्धिसम्पन्नजनाः शास्त्राध्ययनात् भीताः सन्ति। सहजसरलमाध्यमेन शास्त्रस्य विषयं बोधगम्यं कर्तुं न शक्नुवन्ति। किन्तु काव्यं सरलमस्ति, सहजमस्ति च। काव्ये रसप्रधानतया न केवलं बुद्धिमन्तः, मन्दबुद्धिव्यक्तयः अपि सरलसरसेन काव्यस्य विषयं ग्रहीतुं समर्थाः सन्ति। भामहाचार्येण उच्यते –

"प्रायेण दुर्बोधतया शास्त्राद् विभ्यत्यमेधसः।
तदुपच्छन्दनायैष हेतुन्यायलवोच्चयः"।।[1]

यत्कमपि शास्त्ररूपदुर्बोध्यविषयं काव्यस्य सरलतया सरसतया च संक्षेपेन अभिव्यक्ते कृते तच्छात्रं अल्पबुद्धीनां समीपे सहजलभ्यरूपेण प्रतीयते। 'हितोपदेश' इत्यस्मिन् ग्रन्थे एवं दृश्यते यत्, सरलकथामध्यमेन नीतिशास्त्रविषये मूर्खान् राजपुत्रान् ज्ञानं प्रदीयते।

भामहाचार्येण तस्य प्रणीते 'काव्यालङ्कार' इत्यस्मिन् ग्रन्थे शास्त्रसारं (न्यायशास्त्रं) संक्षेपेन प्रस्तुयते। कविः यदा काव्यरचनायां प्रवृत्तो भवति, तदा सः न केवलं कथाक्रमे सीमितो तिष्ठति। क्वापि नीतिसारं, क्वापि व्याकरणिकज्ञानस्य चमत्कारिता, क्वापि शास्त्रज्ञानं, क्वापि दर्शनं, अध्यात्मम्, खगोलशास्त्रम्, ज्योतिषमादिसम्वन्धज्ञानं काव्ये प्रस्तुयते। महाकविः भर्तृहरिः वा भट्टिस्वामी व्याकरणज्ञानमुद्दिश्य

भट्टिकाव्यमिति ग्रन्थं प्रणीतवान्। विद्वान् पण्डितः आचार्यः भामहः अत्रोक्तवान् –

"स्वादुकाव्यरसोन्मिश्रं शास्त्रमप्युपयुञ्जते।
प्रथमालीढमधवः पिवन्ति कटुभेषजम्"।।[2]

संस्कृतसाहित्ये केवलं रचनायाः विषयवस्तुरूपे ये प्रधानतया रसभावयोः उपस्थापनकर्तारः ते कविरूपे आख्यायिते भूतेऽपि परन्तु विशेषरुपेण महत्त्वं प्रदीयन्ते तान् कवीन् ये विविधासु विद्यासु पारङ्गताः सन्ति। साधारणकुलीनस्त्रियोः यदन्तरमस्ति तदन्तरं विद्यानिपुणसाधारणकवयोः चास्ति। एवमुच्यते –

"विद्वत्कवयः कवयः केवलकवयस्तु केवलं कपयः।
कुलजा या सा जाया केवलजाया तु केवलं माया"।।[3]

आचार्येण राजशेखरेण 'काव्यमीमांसा' इत्यस्मिन्ग्रन्थे कविः त्रिविधः मन्यते, शास्त्रकविः, काव्यकविः, उभयकविश्च। पुनश्च शास्त्रकविः त्रिधा, यथा – यः शास्त्रं विधत्ते, यश्च शास्त्रे काव्यं संविधत्ते, योऽपि काव्ये शास्त्रार्थं विधत्ते।[4]

भारतीयदर्शनं मुख्यतया द्विविधम्, आस्तिकदर्शनं नास्तिकदर्शनञ्च। अत्र आस्तिकदर्शनं षड्विधम्, सांख्य-योग-न्याय-वैशेषिक-पूर्वमीमांसा-उत्तरमीमांसा च। अस्मिन् काव्ये भामहाचार्यः न्यायदर्शनस्य किञ्चिदंशमुपस्थापयति।

'प्रमाणम्' इत्यस्मिन् सम्पर्के दार्शनिकविद्वांसः विविधेषु दर्शनग्रन्थेषु तेषां विभिन्नान् मतवादान् पोषयन्ति। आचार्यः भामहः 'काव्यालङ्कार' इत्यस्मिन् ग्रन्थे प्रमाणविषये कथयति –

"सत्त्वादयः प्रमाणाभ्यां प्रत्यक्षमनुमा च ते।
असाधारणसामान्यविषयत्वं तयोः किल"।।[5]

वस्तुनः अस्तित्वसिद्धिकरणार्थं प्रमाणमित्यावश्यकमस्ति। प्रमाणमिति वास्तविकज्ञानम्। कुतः प्रमाणमिदं वस्तुस्थित्या विरुद्धं न जातम्, वास्तविकज्ञानस्यैव च ज्ञापकम्। न केवलं शास्त्रं अपि तु लोकव्यवहारे कस्यचिद् विषयस्य वास्तविकतासम्पर्के ज्ञापनार्थं प्रमाणस्य सन्धानं कुर्वन्ति। प्रत्यक्षानुमानप्रमाणस्य विषयद्वयमस्ति, यथा – असाधारणमिति व्यक्तिः, सामान्यमिति जातिः। ज्ञानेन्द्रियविषययोः सन्निकर्षमाध्यमेन यद् ज्ञानं प्राप्यते तद् ज्ञानं प्रत्यक्षमुच्यते। अस्य प्रमाणस्य विषयमस्ति स्वलक्षणं व्यक्तिः वा। अर्थात् अनेन प्रमाणेन व्यक्तिज्ञानं भवति, न जातिः। लिङ्गपरामर्शेन यद् लिङ्गीज्ञानं भवति तदनुमानप्रमाणम्। अस्य प्रमाणस्य विषयः सामान्यं जातिः वा। अर्थात् अनेन प्रमाणेन जातिज्ञानं भवति, न व्यक्तिः। आचार्यभामहः द्विविधप्रमाणं स्वीकरोति, प्रत्यक्षम् अनुमानञ्च। प्रमाणस्य संख्यासम्पर्के विविधेषु दार्शनिकेषु बहुधा मतभेदाः विद्यन्ते। चार्वाकमते प्रत्यक्षम्, जैन-बौद्ध-वैशेषिकमते प्रत्यक्षम् अनुमानञ्च, न्यायमते प्रत्यक्ष-अनुमान-उपमान-शव्दाः, सांख्यमते प्रत्यक्ष-अनुमान-शव्दाः, योगमते प्रत्यक्ष-अनुमान-आगमाः, प्रभाकर-मीमांसकमते प्रत्यक्ष-अनुमान-उपमान-शव्द-अर्थापत्तयः, वेदान्त-कुमारिल-मीमांसकमते प्रत्यक्ष-अनुमान-उपमान-शव्द-अर्थापत्ति-अभावाः, भर्तृहरिमते प्रत्यक्ष-अनुमान-आगम-अभ्यास-अदृष्टाः।

सर्वैः विद्वद्भिः प्रत्यक्षमिति प्रमाणरूपेण स्वीकृतम्। आचार्येण भामहेन बौद्धप्रदत्तं प्रत्यक्षलक्षणं 'काव्यालङ्कार' इत्यस्मिन् ग्रन्थे खण्डनं क्रियते। भामहाचार्येणोच्यते इत्यस्मिन् विषये—

"प्रत्यक्षं कल्पनापोढं ततोऽर्थादिति केचन।

कल्पनां नाम जात्यादियोजनां प्रतिजानते"।।[6]

कस्यचिद् वस्तुनः कल्पनारहितज्ञानं प्रत्यक्षमिति। कल्पना इत्युक्ते नाम-जाति-गुण-क्रिया-द्रव्योपाधयः बोध्यन्ते। अर्थात् नामजात्यादिहीनं ज्ञानं प्रत्यक्षमित्युच्यते। कल्पनेति अयथार्थमवास्तविकं वा, यस्याः सत्ता नास्ति। नामजात्याद्युपाधयः व्यक्तेरुपरि आरोपिताः भवन्ति। एषां स्वतन्त्रसत्ता नास्ति। अतः प्रत्यक्षज्ञानं न भवति।

आचार्यः दिङ्नागः तस्य प्रणीते 'प्रमाणसमुच्चय' इत्यस्मिन् ग्रन्थे प्रत्यक्षलक्षणविषये उक्तवान्– "प्रत्यक्षं कल्पनापोढं नामजात्याद्यसंयुतम्"।[7] अर्थात् नामजात्यादेः असंयुक्तं, कल्पनाविहीनं ज्ञानं प्रत्यक्षम्।

आचार्यः बौद्धदार्शनिकः धर्मकीर्तिः तस्य कृते 'न्यायबिन्दु' इत्यस्मिन् ग्रन्थे प्रत्यक्षविषये कथयति– "कल्पनापोढमभ्रान्तं प्रत्यक्षम्"।[8]

श्रीमन्महर्षिगौतमप्रणीतं 'न्यायदर्शनमि' त्यस्मिन् ग्रन्थे प्रत्यक्षप्रमाणस्य लक्षणविषये कथितम्– "इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानमव्यपदेशमव्यभिचारि व्यवसायात्मकं प्रत्यक्षम्"।[9]

भामहाचार्यः प्रत्यक्षविषये वाचयति– "सदर्थालम्बनं च तत्"।[10] अर्थात् सत् यथार्थवस्तुनरेव वा प्रत्यक्षज्ञानं भवति। काव्यालङ्कारकारस्य जातिः व्यक्तेः पृथक् इति न मन्तव्यम्। उदाहरणं यथा, कोऽपि जनः दूरात् कस्मिंश्चित् क्षेत्रे पशुमेकं पश्यति। परन्तु इदं न ज्ञायते यत् असौ गौः, महिषः, अश्वः वेति निर्विकल्पकज्ञानमिदम्। कुतः इत्यस्मिन् ज्ञाने जात्यादीनां बोधः न भवति। जनः यथा यथा पशोः समीपं गच्छति, तदैव अयं गौरिति ज्ञायते महिषः अश्वः वा नास्ति। सविकल्पकज्ञानमिदमस्ति। कुतः वस्तु नामजात्याद्युपाधिना सह वर्तते। यदि एतेषाम् उपाधीनां लोपाः भवन्ति तर्हि भिन्नतायाः अपि लोपः भविष्यति। यथार्थतः नामजात्याद्युपाधिभिः वस्तुनां प्रत्यक्षज्ञानं भवति।

विद्वान् भामहाचार्यः युक्तिमाध्यमेन प्रत्यक्षलक्षणं खण्डनं करोत्यनेन वाक्येन –

"तदपोहेषु च तथा सिद्धा सा बुद्धिगोचरा।
अवस्तुकं चेद्वितथं प्रत्यक्षं तत्त्ववृत्ति हि"।।[11]

अर्थात् नामजात्यादयोऽपोहेषु भूतेष्वपि ते बुद्धिगोचराः सिद्धाः भवन्ति। यदि प्रत्यक्षमिति वस्तुरहितं मत्वा अयथार्थमुच्यते, तर्हि तन्नौचित्यम्। कुतः प्रत्यक्षेन यथार्थवस्तु बोध्यते।

'अपोह' इति शव्दस्यार्थः अतद्व्यावृत्तिः। अर्थात् यत् तत् नास्ति, यत् ततः भिन्नमस्ति तस्य निवृत्तिः। यदा अस्माभिः कस्यचित् पदार्थस्य नाम उच्यते, तदा सः एव नामाङ्कितः पदार्थः प्रत्यक्षरूपेण नागच्छति। वरं ततः भिन्नाः पदार्थाः अपसरन्ति फलतः अभिलषितः पदार्थः समीपे आगच्छति। उदाहरणं यथा – यदा अश्वरिति वदति, तदा अवशिष्टाः प्राणिनः स्वतः दूरीभूताः भवन्ति केवलं अश्वरिति नाम प्राणी विद्यते।

बौद्धाः नामजात्यादीन् अपोहरूपेण निषेधं कृतेष्वपि तेषां प्रतीतयर्भवन्ति। 'गौः' इत्यस्य पदस्य अर्थप्रतीतिकरणार्थं गोभिन्नपदार्थाः स्वतः अपसरन्ति। परन्तु एतदर्थमपि गोपदस्य ज्ञानमावश्यकमस्ति। 'गोत्वम्' इति अवगतं विना 'गो' इति ज्ञातुं न शक्यते। अथवा व्यक्तिः केवलं तस्य उपाधिभिः ज्ञायते। वस्तुतः प्रत्यक्षेन 'गो' व्यक्तिना गोत्वमपि बोध्यते।

अपरेण युक्तिना भामहाचार्यः कथयति –

"ग्राह्यग्राहकभेदेन विज्ञानांशो मतो यदि।

विज्ञानमत्र सादृश्याद्विशेषोऽस्य विकल्पना"।।[12]

यदि ज्ञानं ग्राह्यग्राहकयोः भिन्नं मन्यते तर्हि ज्ञानस्य सादृश्यमात्रात् तस्य ज्ञानस्य वैशिष्ट्यमवास्तविकं जातम्। यदा एकेन ज्ञानेन अन्यज्ञानं प्राप्यते तदा एकं ग्राह्यज्ञानं अपरं ग्राहकज्ञानं भविष्यति। बौद्धनैयायिकानां मतानुसारं गोव्यक्तेर्ज्ञानं अपोहेन सम्भवति। अस्मिन् स्थले 'गो' व्यक्तिरिति ग्राह्यज्ञानम्, 'अगो' व्यावृत्तिरिति ग्राहकज्ञानं भवति। अत्र 'गो' सामान्यमेनं त्यागे कृते ज्ञानमेव ग्राह्यं ग्राहकं वा भवति। एवं भूते लोकव्यवहारे काचित् समस्या भवेत्। अतः उपाधिना सह वस्तुनः प्रत्यक्षज्ञानं करणीयम्।

आचार्यः भामहः अन्तिमयुक्तिमाध्यमेन प्रत्यक्षखण्डनविषये उक्तवान् –

"अर्थादेवेति रूपादेस्तत एवेति न्यायतः।
अन्यथा घटविज्ञानमन्येन व्यपदिश्यते"।।[13]

कस्यापि वस्तुनः ज्ञानं तद्वस्तुनः एव सम्भवति। यथा पुष्पस्य ज्ञानं पुष्पादेव भवति। अतएव रूपोत्पत्तिः तद्वस्तुनः एव भवतीदं स्वीक्रियते। अन्यथा घटस्य ज्ञानं अन्यप्रकारेणापि भवितुं शक्नोति। अर्थात् वस्तु सर्वदा स्वोपाधिना सह विद्यते। अग्रजेन यदा बालकं कामपि पशुशालां आनयति, तदा सः तं वदति यत् एषः सिंहः, एषः गजः इति। न केवलं रूपं प्रत्यक्षमपितु क्रियाकलापं पश्यति। नामरूपकारयोः समन्वयं विना वस्तुज्ञानं न जातम्।

प्रत्यक्षप्रमाणस्य विवेचनं कृत्वा अधुना अनुमानप्रमाणस्य विषये आलोकयति। आचार्येण भामहेनोच्यते 'काव्यालङ्कार' इत्यस्मिन् ग्रन्थे –

"त्रिरूपाल्लिङ्गतो ज्ञानमनुमानञ्च केचन।
तद्विदो नान्तरीयार्थदर्शनं चाऽपरं विदुः"।।[14]

कैश्चित् जनैः उच्यते त्रिविधहेतुना साध्यज्ञानमेव अनुमानम्। यथा— प्रतिज्ञा-हेतु-उदाहरणमाध्यमेन अथवा उदाहरण-उपनय-निगमनमाध्यमेन साध्यज्ञानं भूयते। अपरेणोच्यते –

नित्यज्ञानसम्वन्धेन वस्तुज्ञानमनुमानम्। अनुमानं द्विविधम्, स्वार्थानुमानं परार्थानुमानञ्च। परार्थानुमानाय पञ्चावयववाक्यानि प्रयोजनानि सन्ति, यथा - प्रतिज्ञा-हेतु-उदाहरण-उपनय-निगमनानि। आचार्यः भामहः एषु प्रथमत्रयं स्वीकरोति।

प्रतिज्ञाविषये श्रीमन्महर्षिगौतमप्रणीतं 'न्यायदर्शनमि'त्यस्मिन् ग्रन्थे उच्यते – "साध्यनिर्देशः प्रतिज्ञा। प्रज्ञापनीयेन धर्मेण धर्मिणो विशिष्टस्य परिग्रहवचनं प्रतिज्ञा, प्रतिज्ञा साध्यनिर्देशः। अनित्यः शब्द इति।।[15]

आचार्येण भामहेन प्रतिज्ञाविषये एवमुच्यते –

"विविधास्पदधर्मेण धर्मीकृतविशेषणः।
पक्षस्तस्य च निर्देशः प्रतिज्ञेप्यभिधीयते"।।[16]

सन्दिग्धविषयरूपी धर्मः (अग्निः) यस्मिन् धर्मिनि (पर्वतः) वर्तते तं पक्षरूपे गणयति। तस्य पक्षस्य निर्देशः प्रतिज्ञारूपे अभिहितः। सन्दिग्धविषयमाश्रित्य अनुमानं भवति, न निर्णीताज्ञातविषयम्वा। यथा – पर्वतः अग्निमान्। अत्र अग्निः धर्मः, पर्वतः वा धर्मी, कुतः अग्निः पर्वते विद्यते। अस्मिन् क्षेत्रे पर्वतः पक्षरित्युच्यते। येन वाक्येन पक्षः निर्दिश्यते, तद्वाक्यं प्रतिज्ञावाक्यमिति। इयं प्रतिज्ञा षड्विधदोषेन दूष्यते, यथा– तदर्थविरोधिनी, हेतुविरोधिनी, सिद्धान्तविरोधिनी, सर्वागमविरोधिनी, प्रसिद्धधर्मा, प्रत्यक्षविरोधिनी च। एषु प्रतिज्ञादोषेषु आचार्यः भामहः तदर्थविरोधिनीति प्रतिज्ञादोषविषये कथयति–

"तयैव हि तदर्थस्य विरोधकरणं यथा
यतिर्मम पिता बाल्यात् सूनुर्यस्याऽहमौरसः"।।[17]

यदि कथितेषु वाक्येषु वाक्यविरोधीकरणस्य तथ्यं वर्तते, तद् वाक्यं निरर्थकरूपे प्रतीयते। अतः तद् वाक्यं तदर्थविरोधिनीप्रतिज्ञादोषः कथ्यते। यथा— यदि केनापि उच्यते यत् मम पिता वाल्यकालात् सन्न्यासी अस्ति, अहञ्च भवतः औरसः पुत्रः अस्मि तर्हि कथनमिदं आत्मविरोधीरूपेण प्रतिपाद्यते।

न्यायदर्शनमते षोडशपदार्थेषु त्रयोदशतमः पदार्थः हेत्वाभासः इति। विषयेऽस्मिन् न्यायशास्त्रकारेण उक्तम्– "हेतुलक्षणाभावादहेतवो हेतुसामान्याद्धेतुवदाभासमानाः। ते इमे– सव्यभिचारविरुद्धप्रकरण-समसाध्यसमकालातीता हेत्वाभासाः"।।[18] हेत्वाभासविषये आचार्यः भामहः वाचयति –

"सन् द्वयो सदृशे सिद्धो व्यावृत्तस्तद्विपक्षतः।
हेतुस्त्रिलक्षणो ज्ञेयो हेत्वाभासो विपर्ययात्"।।[19]

अत्र निर्दोषहेतोः लक्षणत्रयं वर्तते, यथा— सन् द्वयो (स्वपक्षपरपक्षयोः अस्ति), सदृशे सिद्धो (सपक्षे अस्ति), व्यावृत्तस्तद्विपक्षतश्च (विपक्षे अस्ति)। हेतुः विपर्यये भूते हेत्वाभासो भवति। अत्र न्यायमतानुसारं अन्वयव्यतिरेकी, केवलान्वयी, केवलव्यतिरेकी च दरीदृश्यते। उदाहरणमेकं यथा– धूमवत्त्वात् पर्वतोऽग्निमान्। अत्र धूम्रः सद्हेतुः, कुतः स्वपक्षः परपक्षश्च स्वीक्रियते, सपक्षः पाकशालायामप्यस्ति, विपक्षश्च जलाशये न विद्यते।

**निष्कर्षः**– काव्यशास्त्रज्ञेषु रक्रिलगोमी पुत्रः आचार्यः भामहः सुप्रसिद्धः विद्वान् आसीत्। सुधीसमाजे सः अलङ्कारसम्प्रदायस्य प्रतिष्ठातारूपे परिचयं लभते। काव्यशास्त्रमाधारीकृत्य तेन प्रणीतः 'काव्यालङ्कार' इति ग्रन्थोऽयं सुप्रसिद्धो भूयते। ग्रन्थोऽयं षष्ठपरिच्छेदेषु विभक्तोऽस्ति। ग्रन्थस्यास्य पञ्चमपरिच्छेदे कविः भामहः वर्णनीयविषयरूपे काव्यशास्त्रविवेचनायाः न्यायशास्त्रस्य प्रमाणप्रकरणं प्रति अधिकं सम्बन्धं प्रदीयते। प्रमाणस्य आवश्यकताम्, भेदम्, विषयञ्च उपस्थाप्य बौद्धनैयायिकेन प्रदत्तं प्रत्यक्षलक्षणं युक्तिना खण्डनं क्रियते। आचार्यः भामहः प्रत्यक्षस्य विषयरूपे नामजात्याद्युपाधिसम्पन्नव्यक्तिं वस्तुं वा स्वीकरोति, सोपाधिकः व्यक्तिः प्रत्यक्षमिति मन्यते। प्रमाणं द्विविधम्, प्रत्यक्षमनुमानञ्च। अनुमानप्रमाणार्थं पञ्चावयववाक्येषु आचार्येण भामहेन प्रतिज्ञा-हेतु-उदाहरणानि स्वीक्रियन्ते। अत्र प्रतिज्ञा षड्विधदोषेन दूष्यते। हेतुः विपर्यये भूते हेत्वाभासो भवति। अतः निर्दोषहेतोः लक्षणत्रयं वर्तते।

## Endnotes

1. काव्यालङ्कारः, ५.२
2. पूर्ववत्, ५.३
3. पूर्ववत्, पृष्ठा - २२३
4. काव्यमीमांसा, पंचमोऽध्याय
5. काव्यालङ्कार, ५.५
6. काव्यालङ्कार, ५.६
7. *Pramana Samuccaya*, वृत्ति – ३, पृष्ठा - ८
8. न्यायबिन्दुः, पृष्ठा - ८
9. न्यायदर्शनम्, १.१.४
10. काव्यालङ्कार, ५.७
11. पूर्ववत्, ५.८
12. काव्यालङ्कार, ५.९
13. पूर्ववत्, ५.१०
14. काव्यालङ्कार, ५.११
15. न्यायदर्शनम्, १.१.३३
16. काव्यालङ्कार, ५.१२
17. काव्यालङ्कार, ५.१४
18. न्यायदर्शनम्, १.२.४
19. काव्यालङ्कार, ५.२१

## Bibliography


- भामह। काव्यालङ्कारः। सम्पा. साहित्यवारिधि डॉ.रामानन्द शर्मा। चौखम्बा संस्कृत सीरीज आफिस, वाराणसी, २०२१.
- गौतम। न्यायदर्शनम्। सम्पा. आचार्य ढुण्ढिराजशास्त्री। चौखम्बा संस्कृत भवन, वाराणसी, २०२१.
- केशवमिश्र। तर्कभाषा। सम्पा. प्रो. शर्वाणी गाङ्गुली। संस्कृत पुस्तक भण्डार, कोलकाता, २००५.
- केशवमिश्र। तर्कभाषा। व्याख्या. श्रीबदरीनाथशुक्लः। मोतीलाल बनारसीदास। प्रथम संस्करण – १९६८.
- धर्मकीर्ति। न्यायबिन्दुः। सम्पा. आचार्य श्रीचन्द्रशेखर शास्त्री। चौखम्बा संस्कृत सीरीज आफिस, बनारस – १, १९५४.
- दिङ्नाग। Pramana Samuccaya. H. R. Rangaswamy Iyengar. Mysore University Publication, Mysore, 1930.
- राजशेखर। काव्यमीमांसा। सम्पा. गंगासागर राय। चौखम्बा विद्याभवन, वाराणसी, २०१७.
- Mukhopadhyaya, Gobindagopal. A New Tri Lingual Dictionary. Kolkata: Sanskrit Book Depot. Reprint June, 2013. First published July, 2006.


——